# व्याकरणशास्त्रे अव्ययस्वरूपं प्रयोगश्च

**Rahul Dan**
Research Scholar, Bankura University
Bankura, West Bengal, India
Email: rahuldankht@gmail.com

Abstract: अस्मिन् शोधप्रबन्धे व्याकरणशास्त्रे अव्ययानां स्वरूपं, भेदाः, प्रयोगश्च विस्तरेण आलोचिताः। व्याकरणदृष्ट्या अव्ययानि तानि पदानि सन्ति, येषां रूपं त्रिषु लिङ्गेषु, सर्वासु विभक्तिषु, सर्वेषु वचनेषु च न परिवर्तते। महर्षिपाणिनेः अष्टाध्यायी-सूत्रानुसारं "स्वरादिनिपातमव्ययम्" इति सूत्रेण अव्ययसंज्ञा विधीयते। प्रबन्धेऽस्मिन् मौलिकाव्ययानि, कृत्तद्धितप्रत्ययान्ताव्ययानि, समासनिष्पन्नाव्ययानि (अव्ययीभावः), विभक्तिप्रतिरूपकाव्ययानि च सोदाहरणं व्याख्यातानि। अव्ययपदानि वाक्ये क्रियाविशेषणरूपेण वा विशेषणरूपेण प्रयुज्यन्ते, यद्यपि एतेषां विभक्तिलोपो भवति, तथापि पदत्वसिद्धये सुप्-प्रत्ययानां विधानं कल्प्यते। अपि च, विविधानां अव्ययानां योगे द्वितीया -तृतीयादि-विभक्तीनां नियमबद्धः प्रयोगः अपि अत्र प्रदर्शितः। निष्कर्षतः, अव्ययानां प्रयोगः संस्कृतवाक्यरचनायां सौन्दर्यम्, स्पष्टतां, प्रवाहञ्च आनयति। शोधच्छात्राणां कृते अयं प्रबन्धः अव्यय-प्रयोगात्मक-ज्ञानाय अतीव उपयुक्तः वर्तते।

Keywords: अव्ययम्, व्याकरणशास्त्रम्, स्वरादिनिपातः, अव्ययीभावः, पदप्रयोगः।

## भूमिका

संस्कृतभाषायाः व्याकरणशास्त्रे अव्ययानाम् अपरिहार्यं स्थानम् अस्ति। लिङ्गवचनविभक्त्यादि-परिवर्तनरहितानि पदानि “अव्यय” इति प्रसिद्धानि। त्रिषु लिङ्गेषु सप्तसु विभक्तिषु त्रिषु च वचनेषु यस्य पदस्य परिवर्तनं न जायते, तत्पदम् अव्ययम् इति उच्यते। तन्नाम वाक्येषु प्रयोगकाले यत्पदं सर्वदा अपरिवर्तितं भवति, तत् अव्ययम् इति। अतः उच्यते—

“सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम्।।”

“सामान्ये नपुंसकम्” इत्यनेन नियमेन अव्ययपदानि नपुंसकलिङ्गे एव व्यवह्रियन्ते इति। अतः अव्ययपदस्य विशेषणं नपुंसकलिङ्गं भवति। अव्ययपदानि सर्वासु विभक्तिषु समान एव वर्तन्ते। अव्ययपदैः सह विभक्तिसंयुक्ते सति लोपो भवति। “अव्ययादाप्सुपः” इति। अव्ययशब्दैः सह विभक्तिसंयोगस्य प्रयोजनं नास्तीति। यतः “नापदं शास्त्रे प्रयुञ्जीत”। कोऽपि शब्दः वाक्येषु व्यवहारार्थं पदपरिणतं कर्तुं शक्यते। अव्ययं यतः शब्दः अतः तत्र सुप्-विभक्तिः संयुज्यते इति। यथा— “कदापि मिथ्या न वदेत्” इत्यस्मिन् वाक्ये मिथ्या हि अव्ययपदम्। मिथ्या इति पदं वाक्ये व्यवहारं न कृत्वा अन्यः कोऽपि शब्दः वाक्ये यदि व्यवह्रियते तर्हि वाक्यम् एवं भवितुम् अर्हति, यथा— “कदापि अनृतम् असत्यं वा न वदेत्” इति। अस्मिन् वाक्ये अनृतम् असत्यञ्च द्वे पदे कर्मकारकसंज्ञा द्वितीयाविभक्तिश्च भवतः। परन्तु प्रथमवाक्ये मिथ्या इति पदस्य द्वितीयाविभक्तेः लोपो भवति। अतः वक्तुं शक्यते यत्— सर्वासु विभक्तिषु अव्ययरूपं समानं वर्तते इति।

“अव्ययीभावश्च”[1] इति सूत्रेण अव्ययीभावसमासनिष्पन्नः शब्दः अव्ययम् इति। अपि च “अव्ययीभावश्च”[2] इति सूत्रेण अव्ययीभावसमासनिष्पन्नः शब्दः नपुंसकलिङ्गं भवति। अव्ययीभावसमासनिष्पन्नशब्दः वाक्ये प्रयुक्ते सति तस्य उत्तरवर्तीविभक्तेः लोपो भवति। परन्तु एकस्मिन्

क्षेते व्यतिक्रमः दृश्यते इति। यथा— "नाव्ययीभावादतोऽमत्वपञ्चम्याः"[3] इति सूत्रे अव्ययीभावसमासे अकारान्तशब्दात् परं विभक्तेः लोपो न भवति। तत्र अव्ययीभावसमासस्य अव्ययत्वं सिद्धं न भवति। यथा— अपदिशात्, अपदिशाभ्याम्, अपदिशेभ्यः। अव्ययपदं सर्वेषु वचनेषु एकरूपं विद्यते इति। सदा अव्ययपदम् एकवचने एव प्रयुज्यते इति। अतः अव्ययपदस्य विशेषणम् अपि एकवचनं भवति। अव्ययस्य बहवः भेदाः परिलक्ष्यन्ते। यथा—

1) **मौलिकाव्ययानि—** अङ्ग, अहो, वा, च, हि, तु, अपि, अर्थे, अलम्, कृतम्, किम्, अहह, आ, इव, इह, किल, वत चेत्यादयः।

2) **कृत्तद्धितप्रत्ययान्ताव्ययानि—** गत्वा, आगम्य, गन्तुम्, स्मारं स्मारम् इति कृदन्ताव्ययानि। अग्रतः, सर्वतः, तत्र, कर्हि, एतर्हि, त्रिधा, एकधा, दक्षिणेन, पितृवत्, मातृवत् चेत्यादयः।

3) **समासनिष्पन्नाव्ययानि—** प्रत्यक्षम्, परोक्षम्, अधिहरि, समुद्रम्, अनुगङ्गम्, केशाकेशि चेत्यादयः।

4) **विभक्तिप्रतिरूपकाव्ययानि—** वामतः, सर्वतः, अधरतश्चेत्यादयः।

महर्षिपाणिनेः मते अव्ययस्य विभागद्वयं वर्तते। स्वरादिः चादिनिपातश्चेति। स्वरादिः इति प्रथमविभागस्य विभागत्रयं वर्तते। यथा— क)स्वरादिगणः ख)कृत्तद्धितान्ताव्ययानि ग) समासनिष्पन्नाव्ययानि। चादिनिपातस्य विभागद्वयं वर्तते। यथा— क)चादिगणीयाव्ययानि ख)उपसर्गाः। "स्वरादिनिपातमव्ययम्"[4] अर्थात् स्वर्-प्रभृतिशब्दाः निपातशब्दाश्च अव्ययसंज्ञका इति। बहवः स्वरादिशब्दाः सन्ति। यथा— स्वर्, अन्तर्, प्रातर्, पुनर्, उच्चैस्, नीचैस्, शनैस्, ऋते, युगपत्, आरात्, पृथक्, श्वस्, दिवा, सायम्, चिरम्, मनाक्, ईषत्, जोषम्, तुष्णीम्, बहिस्, अधस्, समया, निकषा, स्वयम्, मृषा, नक्तम्, सामि, अद्धा, तिरस्, अन्तरा, सहसा, अन्तरेण, अलम्, स्वस्ति, स्वधा, वषट्, नाना, विना, अस्ति, उपांशु, दोषा, मुधा, दिष्ट्या, मिथ्या, वृथा, पुरा, मिथः, मिथस्, प्रायस्, मुहुस्, अभीक्ष्नम्, सायम्, सत्रम्, समम्, सार्धम्, नमस्, हिरुक्, अथ, आम्, तथाहि, माङ्, कामम्, प्रकामम्, भूयस्, परम्, साक्षात्, साचि, अवश्यम्, संवत्, सपदि, प्रादुस्, आविस्, नित्यम्, नित्यदा, सदा, अजस्रम्, सततम्, ऊषा, ओम्, झटिति, तरसा, सुष्ठु, अञ्जसा, चिरम्, चिरेण, चिराय, चिरात्, चिरस्य, अस्तम्, स्थाने, वरम् इत्यादयः।

अपि च कृत्तद्धितसमासनिष्पन्नं प्रातिपदिकम् अव्ययम् इति। तत् अव्ययम् अपि स्वराद्यव्ययस्य अन्तर्गतम् इति।

च, वा, ह, नूनम् इति अव्ययानि निपातसंज्ञकानि। "चादयोऽसत्त्वे" इति सूत्रेण च-प्रभृतिशब्दाः निपातसंज्ञकाः भवन्ति। चादिगणे अङ्ग इति शब्दः पठितः अस्ति। यथा— अङ्ग पश्यामि। अत्र अङ्गशब्दः निपातसंज्ञकः। परन्तु अङ्गशब्दस्यार्थः यदि देहः एकः विशेषः देशः वा बोध्यते तर्हि तत्र अव्ययसंज्ञा न भत्वा विशेष्यसंज्ञा भवति। अपि च पशु इति शब्दः चादिगणे पाठः अस्ति। यदा पशु शब्दस्यार्थः सम्यक् भवति तत्र निपातसंज्ञको भवति परन्तु यदा प्राणी इति अर्थः बोध्यते तदा विशेष्यपदं भवति।

"प्राग्रीश्वरान्निपाताः"[5], "चादयोऽसत्त्वे"[6], "अधिरीश्वरे"[7] चेति चादिगणे पठितानि त्रीणि सूत्रलक्षणीयानि इति। अर्थात् 'च' इत्यतः अधिपर्यन्तं शब्दाः निपातसंज्ञकाः इति। चादिगणे पठितानि निपातसंज्ञकाव्ययानि हि— च, वा, ह, अह, एव, एवम्, नूनम्, शश्वत्, युगपत्, भूयस्, चेत्, कच्चित्, यत्र, तत्र, नह, हस्त, माङ्, नञ्, तावत्, रे, श्रौषट्, वौषट्, स्वाहा, स्वधा, ओम्, खलु, किल्, तथाहि, अथ, सुष्ठु, स्म, अ, इ, उ, ऋ, ए, ओ, ऐ, औ, यत्, तत्, किम्, यथा, धिक्, पुरा, आहो, उताहो, अहो, नो, अथो, ननु,

मिथ्या, तु, इति, नु, वत, इव, सत्यम्, ऋतम्, अद्धा, नचेत्, नोचेत्, कथम्, कुतस्, कुत्र, जातु, नहि, अव, अनु, हा, हे, आहोस्वित्, दिष्ट्या, पशु, सह, अङ्ग, अये, फट् चेत्यादयः।

उपसर्गाः अपि निपातसंज्ञकाः। "उपसर्ग-विभक्ति-स्वरप्रतिरूपकाश्च निपाताः"। "प्रादयः"[8], "उपसर्गाः क्रियायोगे"[9], "ते प्राग्धातोः"[10] । उपसर्गविधायकसूत्राणि "चादयोऽसत्त्वे"[11] "अधिरीश्वरे"[12] च द्वयोः सूत्रयोः विद्यन्ते इति। अतः "प्राग्रीश्वरान्निपाताः" इति सूत्रेण उपसर्गाः निपातसंज्ञकाव्ययानि इति।

**अव्ययविषयकसूत्राणां सामान्यज्ञानम्**

1) **"स्वरादिनिपातमव्ययम्"**[13] — स्वर्-प्रभृतिशब्दाः च-प्रभृतिनिपातशब्दाः सर्वदा निपातसंज्ञकानि अव्ययानि इति। यथा— स्वर्, प्रातर्, अन्तर्, प्रादुर्, पुनर्, उच्चैस्, नीचैस्, दिवा, बहिस्, मृषा, चित्, चन्, अ, आ, इ, ई, स्वरादयो वाचकाः, चादयो द्योतका इत्यनयोर्भेदः। इयं संज्ञा महर्षिणा पाणिनिना कृता।

2) **"प्राग्रीश्वरान्निपाताः"**[14] — अस्मात् सूत्रात् परं "चादयोऽसत्त्वे"[15] सूत्रतः "अधिरीश्वरे"[16] सूत्रपर्यन्तं ये अव्ययशब्दाः उल्लिखिताः सन्ति ते निपातसंज्ञकाः इति।

3) **"चादयोऽसत्त्वे"**[17] — "अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः"। द्रव्यभिन्नः अन्यः अर्थः यदि बोध्यते तर्हि चेत्येषां शब्दानां निपातसंज्ञकाः भवन्ति इति। परन्तु यदि द्रव्यं बोध्यते तर्हि निपातसंज्ञकः अव्ययसंज्ञकश्च कोऽपि न भवति।

क) अव्ययशब्दानां केचित् निपातसंज्ञकाः।

ख) निपातशब्दाः अवश्यमेव अद्रव्यवाचकाः। परन्तु स्वरादिगणे पठितानि अव्ययानि द्रव्यवाचकानि अद्रव्यवाचकानि च द्वयमेव भवितुम् अर्हति इति।

ग) उपसर्गाः निपातसंज्ञकाः। इमे निपातसंज्ञकाः क्रियायाः आदौ व्यवह्रियन्ते तर्हि तेषां नाम उपसर्गाः। परन्तु पृथक्-रूपेण वाक्ये प्रयुक्ते सति तेषां नाम कर्मप्रवचनीयम् इति।

4) **"प्रादयः"**[18] — प्र-प्रभृत्यव्ययान्यपि निपातसंज्ञकानि। एते उपसर्गाः भवन्ति। "ते प्राग्धातोः"[19] इति सूत्रेण एते उपसर्गाः धातोः प्रागेव प्रयुज्यन्ते इति। विंशतिः उपसर्गाः सन्ति। यथा— प्र, परा, अप, सम्, अनु, अव, निर्, दुर्, अभि, वि, सु, अधि, उत्(उद्), अति, नि, प्रति, परि, अपि, उप, आङ्(आ)। निस्, दुस् चेति मिलित्वा उपसर्गाणां संख्याः द्वाविंशतिः इति केचित् वैयाकरणाः उक्तवन्तः।

5) **"तद्धिताश्चासर्वविभक्तिः"**[20] — केषुचित् तद्धितप्रत्ययान्तशब्देषु सर्वाः विभक्तयः न भवन्ति इति। एते शब्दाः अव्ययसंज्ञकाः भवन्ति। तद्धितप्रत्यययोगेन प्रत्ययान्तशब्दाः अव्ययसंज्ञकाः भवन्ति ते हि— तसिल्, त्रल्, र्हिल्, दा, थाल्, अस्ताति, अतसुच्, आ, आहि, दानीम्, धाच्, शस्, एनप्, ना, था, नाञ्, सुच्, कृत्वसुच्, तसि, साति, च्वि, आम्, डाच्, अम्, त्रा, आमु, वतिच्, आच्, तनप् चेत्यादयः। यथा— सर्वतः, अग्रतः, सर्वत्र, कुत्र, तर्हि, कर्हि, अन्यदा, सर्वथा, अन्यथा, अधरस्तात्, बहुधा, अनेकधा, अनेकशस्, अन्येद्युस्, इदानीम्, तदानीम्, उत्तरा, दक्षिणा, उत्तराहि, उत्तरेण, द्विः, त्रिः, पञ्चकृत्वस्, भस्मसात्, भूमिसात्, पितृवत्, मातृवत् चेति। एते तद्धितप्रत्ययान्ताः अव्ययसंज्ञकाः इति।

6) **"कृन्मेजन्तः"**[21] — एजन्तः इत्यस्यार्थः— यस्य अन्ते एच् (ए, ओ, ऐ, औ) प्रत्याहारस्थिताः वर्णाः सन्ति। येषां कृत्प्रत्ययान्तशब्दानाम् अन्तिमे (म्, ए, ओ, ऐ, औ) वर्तन्ते ते शब्दाः अव्ययसंज्ञकाः इति। यथा— कर्तुम् (कृ+तुमुन्), स्मारम् स्मारम् (स्मृ+णमुल्)। कृत्प्रत्ययान्तैजन्तशब्दानाम् उदाहरणानि वेदे प्राप्यन्ते। यथा— जीवसे, पिवध्यै।

7) **"त्त्वा-तोसुन्-कसुनः"**[22] — त्त्वा, तोसुन्, कसुन् चेति प्रत्ययान्तशब्दाः अव्ययसंज्ञकाः। यथा— कृ+त्त्वा = कृत्वा। तोसुन्-कसुन्-प्रत्ययान्तशब्दानाम् उदाहरणानि वेदे प्राप्यन्ते। यथा— उदेतोः, विसृपः। "समासेऽनञ्पूर्वे त्त्वो ल्यप्"[23] इति सूत्रेण ल्यप्प्रत्ययान्ताः शब्दाः अपि अव्ययसंज्ञकाः भवन्ति। यथा— आ-दा+ल्यप् = आदाय।

8) **"अव्ययीभावश्च"**[24] — अव्ययीभावसमासनिष्पन्नाः शब्दाः अपि अव्ययसंज्ञकाः भवन्ति। यथा— दिशयोः मध्यम् = अपदिशम्। कृष्णस्य समीपम् = उपकृष्णम्। हरौ इति = अधिहरि। तृणमपि अपरित्यज्य = सतृणम्। अक्ष्णोः प्रति = प्रत्यक्षम्। अक्ष्णोः परम् = परोक्षम्।

9) **"इच् कर्मव्यतिहारे"**[25] — सूत्रमिदं समासविषयकम् इति। परस्परकर्मविनिमयेन व्यतिहारबहुव्रीहिसमासे समासान्तः इच्-प्रत्ययो भवति। "तिष्ठद्गुप्रभृतीनि च"[26] इति सूत्रे तिष्ठद्गुगणे इच्-प्रत्ययस्य पाठः वर्तते इति। अस्य इच्-प्रत्ययान्तपदस्य अव्ययत्वं भवति। यथा— केशाकेशि। गदागदि। मुष्टीमुष्टि।

10) **"ऊर्यादिच्विडाचश्च"**[27] — ऊरीप्रभृतिशब्दाः च्वि-डाच्-प्रत्ययान्तशब्दाश्च निपातसंज्ञकानि अव्ययानि इति। यथा— ऊरी, ऊररी, ताली, वेताली, वौषट्, वषट्, श्रौषट्, श्रत्, स्वाहा, स्वधा, प्रादुस्, आविस् चेत्यादयः।

11) **"साक्षात् प्रभृतीनि च"**[28] — साक्षात्प्रभृत्यव्ययशब्दाः निपातसंज्ञकाः भवन्ति। यथा— साक्षात्, मिथ्या, अमा, अद्धा, अर्थे, नमस् चेत्यादयः।

**अव्ययशब्दस्य व्यवहारः**

1) **"अव्ययादाप् सुपः"**[29] — अव्ययात् परं स्त्रीप्रत्ययस्य सुप्-विभक्तेश्च लोपो भवति। सूत्रे आप्-लोपस्य प्रसङ्गे सत्यपि आप्-प्रत्ययलोपस्य किमपि प्रयोगक्षेत्रं न आयातीति। यतः "सामान्ये नपुंसकम्" इति विध्यनुसारेण अव्ययशब्दस्य नपुंसकत्वं सिद्धम् इति। वाक्ये अव्ययस्य पदत्वसिद्धर्थम् आदौ विभक्तिः प्रयुज्यते इति ततः परम् अनेन सूत्रेण विभक्तेः लोपो भवतीति। अतः वक्तुं शक्यते यत्— अव्ययस्य विभक्तिरूपगतं किमपि परिवर्तनं न भवति।

2) अव्ययस्य लिङ्गं नास्ति परन्तु क्लीवलिङ्गं भवति इति मन्यते। अव्ययस्य वचनं नास्ति परन्तु सर्वदा एकवचने भवतीति मन्यते। अव्ययस्य विभक्तिः नास्ति परन्तु प्रथमाविभक्तियुक्तं भवति इति मन्यते। अतः अव्ययस्य विशेषणं क्लीवलिङ्गस्य प्रथमायाः एकवचने भवति।

3) विभक्तिः लोपे सति अव्ययानि स्वरूपाणि एव व्यवह्रियन्ते इति। परन्तु पदत्वसिद्धर्थं कस्यचित् अव्ययस्य स्-कारस्थाने र्-कारस्थाने च विसर्गादेशो भवति।

4) अव्ययस्य कारकं न भवति। परन्तु क्रियया सह अर्थगतेन योगविचारेण तस्य कारकत्वप्रसङ्गं कल्पितं भवितुम् अर्हति। यथा— मिथ्या (मिथ्या वाक्यं) वदति। अत्र कर्मकारकस्य प्रसङ्गः वर्तते इति। प्रातः (प्रातःकाले/समये/वेलायाम्) पठति। अत्र अधिकरणकारकस्य प्रसङ्गः वर्तते इति।

5) अव्ययं विशेष्य-विशेषण-क्रियाविशेषण-रूपेण व्यवह्रियन्ते इति। यथा—

**विशेष्यरूपेण**— मनोहरं प्रातः, निथ्या न वदेत्, दिवा मा साप्सीः, नक्तम् अपगतम्।

**विशेषणरूपेण**— इदं वक्तुं न साम्प्रतम्, सा अतीव धूर्ता, निथ्या वाक्यं मा वदेत्।

**क्रियाविशेषणरूपेण**— वृथा गच्छसि, कथं मुधा प्रार्थयसे, ईषत् विहस्य सा प्राह, सकृत् कन्या प्रदीयते, ते एकत्र तिष्ठन्ति, भृशं रोदिति बाला।

6) कानिचित् अव्ययानि विशेष्यपदे सर्वनामपदे वा विभक्तिप्रयोगनियन्त्रणं कुर्वन्ति। अर्थात् विशेषाव्यययोगेन विशेषविभक्तिर्भवतीति। यथा—

**क) प्रथमा विभक्तिः—** दशरथ इति राजासीत्। हर्षवर्धन इति राजासीत्।

**ख) द्वितीया विभक्तिः—** रामः श्यामं पृथक्, ग्रामं दक्षिणेन वनम्, हरिः त्वां मां च अन्तरा तिष्ठति, अन्तरेण हरिं कुतः सुखम्, धिक् त्वां प्राणिघातकम्। अन्तरा, अन्तरेण, अभितः, परितः, सर्वतः, उभयतः, धिक्, अधोऽधः, उपर्युपरि, यावत्, ऋते, समया, निकषा, हा, प्रति, अनु चेति अव्यययोगेन द्वितीया विभक्तिः भवति। अपि च अनु, उप, परि, अभि, अधि, प्रति, अति, अपि एतानि अव्ययानि कर्मप्रवचनीयानि भवन्ति, अत्रापि द्वितीया विभक्तिः भवति।

**ग) तृतीया विभक्तिः—** अलं श्रमेण, विवादेन किम्, पुत्रेण सह पिता आगच्छति, तेन साकं न गन्तव्यम्, त्वया सार्धं न गमिष्यामि, श्रमेण विना न विद्या, त्वं मया पृथक्, नाना नार्या निष्फला लोकयात्रा।

**घ) चतुर्थी विभक्तिः—** शिवाय नमः, सर्वेभ्यः स्वस्ति, अग्नये स्वाहा, पितृभ्यः स्वधा, इन्द्राय वषट्, इन्द्राय वौषट्, विवादाय अलम्।

**ङ) पञ्चमी विभक्तिः—** वनात् आरात् नदी, कृष्णात् ऋते न सुखम्, ग्रामात् दक्षिणा वनम्, ग्रामात् दक्षिणाहि नदी, बाल्यात् प्रभृति सोऽन्धः, आ सकलात् ब्रह्म, अप हरेः संसारः, परि हरेः संसारः, रामात् पृथक् श्यामः, श्रमात् विना न विद्या, प्रद्युम्नः कृष्णात् प्रति।

**च) षष्ठी विभक्तिः—** ग्रामस्य पुरस्तात् नदी, गृहस्य पुरः उद्यानम्, वृक्षस्य अधः फलानि, मन्दिरस्य दक्षिणात् मम गृहम्, ग्रामस्य उत्तरतः वनम्, गण्डस्य उपरि पिण्डकः, पर्वतस्य उपरिष्टात् पश्यामि, ग्रामस्य उत्तरेण नदी, दिवसस्य पञ्चकृत्वः पठति, दिवसस्य त्रिः स्वपिति, दिवसस्य सकृत् भुङ्क्ते।

**छ) सप्तमी विभक्तिः—** अधि भुवि रामः, उप परार्धे हरेः गुणाः।

7) "अव्ययं विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्था-भावात्ययासम्प्रति-शब्दप्रादुर्भाव-पश्चाद्यथानुपूर्व्य-यैगपद्य-सादृश्य-सम्पत्ति-साकल्यान्तवचनेषु"[30] इति सूत्रेण अव्ययीभावसमासे विभक्ति-समीप-समृद्धि-व्यृद्धि-अर्थाभाव-अत्यय-असम्प्रति-शब्दप्रादुर्भाव-पश्चात्-आनुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-योग्यता-वीप्सा-प्रभृत्यर्थेषु पूर्वपदरूपेण अव्ययपदानि प्रयुक्तानि इति। यथा- हरेः समीपम् = उपहरि, मद्राणां समृद्धिः = संमद्रम्, भिक्षायाः अभावः = दुर्भिक्षम्, हिमस्य अत्ययः = अतिहिमम्, निद्रा सम्प्रति न युज्यते = अतिनिद्रम्, हरेः पश्चात् = अनुहरि, रूपस्य योग्यम् = अनुरूपम्, शक्तिम् अनतिक्रम्य = यथाशक्ति, चक्रेण युगपत् = सचक्रम्। इत्येतेषु उदाहरणनेषु उप-सम्-दुर्-अति-अनु-सह-प्रभृत्यव्ययानि समासबद्धपदस्य पूर्वपदरूपेण प्रयुक्तानि इति।

8) भोः-हे-प्रभृत्यव्ययानि सम्बोधने प्रयुक्तानि इति। यथा— भोः पान्थ!, हे राम।

9) आः-अहो-हा-हन्त-प्रभृत्यव्ययानि बहुविधभावप्रकाशं कुर्वन्तीति। यथा— आः दूरमपसर, हा हन्तोऽस्मि, अहो मधुरं दृश्यम्।

10) च-वा-यदि-चेत्-यावत्-तावत्-प्रभृत्यव्ययशब्दाः वाक्यांशस्य संयोगं वियोगं वा कुर्वन्तीति। यथा- रामो भरतश्च गच्छतः, स च सा च वदतः, स च त्वं च अहं च वदामः, लतिका राधिका वा गच्छेत्, यावत् जीवेत् सुखं जीवेत्, आम्रं वा द्राक्षां वा आनय, यावत् जीवामि तावत् स्मरामि, तव गृहं गच्छामि चेत् नक्तं स्थास्यामि।

11) क्त्वा-ल्यप्-तुमुन्-णमुल्-प्रत्ययान्तकृदन्ताव्ययानि असमापिकाक्रियारूपेण प्रयुक्तानि इति। यथा— स्नात्वा पीत्वा सुखी भव, मातरं प्रणम्य गृहं गच्छ, बालिका भोक्तुम् आगच्छति, स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्।

12) कानिचित् अव्ययानि वाक्यालंकाररूपेण वाक्ये प्रयुक्तानि इति। एतेषां विशेषोऽर्थः नास्ति। अर्थोऽस्ति चेत्, तर्हि एतत् अव्ययं वाक्यस्य सौन्दर्यार्थं प्रयुक्तं भवेत्, तदा तत् निरर्थकं भवेदिति। एतैः सह वाक्यस्य कस्यापि पदस्य अन्वयो न विद्यते इति। यथा— किं तावत् समासः? इह खलु जगति सर्वे मरणशीलाः। विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्।

13) केषुचित् विशेषक्षेत्रेषु अव्ययस्य स्वरूपव्यवहारविषये व्यतिक्रमाः परिलक्ष्यन्ते इति। यथा—

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।
आपं चैव हलन्तानां यथा वाचा निशा दिशा।।"[31]

व्याकरणाचार्येण भागुरिणा उक्तम्— अप्-अपि-उपसर्गात्मकनिपातद्वयस्य आदौ स्थितस्य अ-कारस्य विकल्पेन लोपो भवति। यथा— अपि-नह्+क्त = अपिनद्धः/पिनद्धः, अव-गाह् +ल्यप् = अवगाह्य/वगाह्य।

**कतिपयाव्ययप्रयोगाः**

व्याकरणशास्त्रे बहूनि अव्ययपदानि परिलक्ष्यन्ते इति। वाक्यसौन्दर्यार्थम् अव्ययपदस्य प्रयोगः अत्यावश्यक इति।

1) अकस्मात् (सहसा)— अकस्मात् वर्षणम् आरभते।
2) अग्रतः (अग्रत+सिल्)— अग्रतः प्रययौ विमलः।
3) अङ्ग (अङ्ग+अच्)— बालोऽपि नावमन्तव्यः किमङ्ग राजा।
4) अलम् (निषेधार्थे)— अलं साहसेन।
5) असकृत् (पुनः पुनः)— बालकः असकृत् अन्नं खादति।
6) अद्य— अद्य शकुन्तला पतिगृहं यास्यति।
7) आः (क्रोधसूचकम्)— आः अपण्डितः खलु भवान्।
8) आ (पर्यन्तम्)— आ मूलात् श्रोतुम् इच्छामि।
9) आरात् (दूरे निकटे वा)— ग्रामात् आरात् नदी।
10) आविः (प्रकाशार्थे)— देवी आविर्भूता।
11) इति— अयोध्यायां दशरथ इति राजासीत्।
12) इदानीम् (अधुना सम्प्रति वा)— इदानीं स कुत्र तिष्ठति?।
13) ईषत् (अल्पम्)— ईषदुष्णं दुग्धं पिव।
14) उच्चैः— उच्चैः बालिका क्रन्दति।
15) उपांशुः (रहसि)— उपांशु ते एकत्र मिलित्वा मन्त्रणां कुर्वन्ति।
16) उपरि— गण्डस्योपरि पिण्डकः संवृत्तः।
17) ऋते (व्यतीतम्)— ज्ञानादृते वृथा जीवनम्।
18) एकत्र (एक+त्रल्)— एकत्र वयं ग्रामे निवसामः।
19) एकदा (एक+दाच्)— एकदा कश्चित् श्रृगालः एकं मृगं ददर्श।

20) एतर्हि (अधुना सम्प्रति वा)— दुःखस्य अपगमात् स एतर्हि सुखमनुभविष्यति।
21) औम् (आम्)— औमिति ब्रूमः।
22) कदा— त्वं कदा आगतोऽसि।
23) कामम् (स्वीकारार्थे)— कामं प्रिया न सुलभा।
24) किंवा (अथवा)— सत्यं वद किंवा अस्माद् अपसर।
25) कृते (निमित्तार्थे)— बालकः शिक्षकस्य कृते पुस्तकं ददाति।
26) खलु (निश्चितार्थे)— न चलति खलु वाक्यं सज्जनानां कदाचित्।
27) चिरम् (चिरदिनम्)— कीतिर्यस्य स चिरमेव जीवति।
28) चन (अनिश्चयार्थे)— आसीत् बङ्गेषु काचन नगरी।
29) चेत् (यदि)— नियन्ता चेन्न विद्येत, न कश्चिद्धर्ममाचरेत्।
30) जातु (कदाचित्)— न जातु कामः कामानामुपभोगेन शाम्यति।
31) जोषम् (नीरवम्)— किमिति जोषम् आस्यते त्वया।
32) झटिति (शीघ्रम्)— झटिति गृहं प्रविश।
33) ततः— ततः सूर्ये अस्तं गते ल गृहं जगाम।
34) तत्र— तत्र मम गृहम्।
35) तूष्णीम् (नीरवम्)— तूष्णीं स्थितः मूषिकः।
36) दिष्ट्या (सौभाग्यक्रमेण)— दिष्ट्या भवान् शोभते।
37) द्राक् (शीघ्रम्)— स नूनं तान् द्राक् प्रवुद्धान् करिष्यति।
38) ध्रूवम् (अवश्यमेव)— ध्रूवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति।
39) धिक्— कृपणं धिक्।
40) नक्तम् (रात्रौ)— नक्तं दधि न भुञ्जीत।
41) नमः— शिवाय नमः।
42) निकषा (निकटे)— वनं निकषा नदी।
43) नु (प्रश्नार्थे)— स्वप्नो नु माया नु मतिभ्रमो नु।
44) परितः (चतुर्दिकम्)— ग्रामं परितः नदी।
45) पुनः— पुनर्मूषिको भव।
46) प्रति— दीनं प्रति दयां कुरु।
47) भूयः— भूयो वभाषे मुनिना कुमारः।
48) भृशम् (अतिशयम्)— अयं जनः भृशं कृपणः।
49) मनाक् (ईषत्)— इदं पानीयं न मनाक् अपि मे प्रियम्।
50) मा (निषेधार्थे)— मा कुरु धनजनयौवनगर्वम्।
51) मुधा (वृथा)— मुधा किमु धावसि।
52) यावत्— यावत् जीवेत् सुखं जीवेत्।
53) युगपत्— तदाकर्ण्य सर्वे युगपत् अवदन्।
54) रहः— रहः केवल।

55) वरम्— अपमानात् मृत्युः वरम्।

56) वृथा (निरर्थकम्)— विद्याहीनस्य वृथा हि जीवनम्।

57) वै— मृत्युर्वै प्राणिनां ध्रुवः।

58) शनैः— शनैर्गच्छेत् पथि जनः।

59) शश्वत् (सर्वदा)— जगति किमपि न शश्वत् तिष्ठति।

60) सकृत् (एकवारम्)— सकृत् कन्या प्रदीयते।

61) सदा (सर्वदा)— सदा सत्यं ब्रूयात्।

62) सपदि (तत्क्षणात्)— चौरः सपदि धृतः।

63) सह, सार्धम्, साकम्, समम्— रामः सीतया सह (सार्धम्, साकम्, समम्) वनं जगाम।

64) सहसा— सहसा विदधीत न क्रियाम्।

65) हा— हा कृष्णाभक्तम्।

66) ह्यः— ह्यः मम पिता गृहम् अगच्छत्।

67) प्रति— दरिद्रं प्रति दयां कुरु।

**उपसंहारः**

व्याकरणशास्त्रे बहूनि अव्ययानि परिलक्ष्यन्ते इति। तेषाम् अव्ययानां प्रयोगोऽपि परिलक्ष्यते इति। अव्ययपदयुक्तवाक्यं सुस्पष्टम् अर्थयुक्तञ्च भवति। कारके समासे च बहूनि अव्ययानि प्राप्यन्ते इति। अव्ययपदस्य प्रयोगे का विभक्तिः भवति, तेषां प्रयोगः कुत्र कुत्र भवति अस्मिन् विषये यथार्थरूपेण आलोचना परिलक्ष्यते अस्मिन् शोधप्रबन्धे इति। अपि च कुत्र कुत्र न भवति अस्मिन् विषयेऽपि आलोचना परिलक्ष्यते इति। शोधछात्राः अपि इदं शोधकार्यं पठित्वा उपकृताः भविष्यन्तीति। समाजस्यापि मङ्गलीभवति।

**Endnotes**

1. पा.सू. 1.1.41
2. पा.सू. 2.4.18
3. पा.सू. 2.4.83
4. पा.सू. 1.1.37
5. पा.सू. 1.4.56
6. पा.सू. 1.4.57
7. पा.सू. 1.4.97
8. पा.सू. 1.4.58
9. पा.सू. 1.4.59
10. पा.सू. 1.4.80
11. पा.सू. 1.4.57
12. पा.सू. 1.4.97
13. पा.सू. 1.1.37
14. पा.सू. 1.4.56
15. पा.सू. 1.4.57
16. पा.सू. 1.4.97
17. पा.सू. 1.4.57
18. पा.सू. 1.4.58
19. पा.सू. 1.4.80
20. पा.सू. 1.1.38
21. पा.सू. 1.1.39
22. पा.सू. 1.1.40
23. पा.सू. 7.1.37
24. पा.सू. 1.1.41
25. पा.सू. 5.4.127
26. पा.सू. 2.1.17
27. पा.सू. 1.1.61
28. पा.सू. 1.4.74
29. पा.सू. 1.1.41
30. पा.सू. 2.1.6
31. अञ्जयः, तपनकुमारः। संस्कृतदिशा। पृ- 610

## Bibliography


- मिश्रः, रमाशङ्करः। सम्पादकः। अष्टाध्यायीसूत्रपाठः। मोतिलाल बनारसीदास। दिल्ली 110007। 2017।
- जिज्ञासुः, ब्रह्मदत्तः। सम्पादकः। अष्टाध्यायीसूत्रपाठः। रामलालकपूरट्रास्ट। हरियाणा। 1977।
- शर्मा, गिरिधरः; शर्मा, परमेश्वरानन्दः। सम्पादकौ। वैयाकरणसिद्धान्तकौमुदी बालमनोरमा-तत्त्वबोधिनीव्याख्योपेता(2-भागः)। मोतिलाल बनारसीदास। दिल्ली 110007। 2012।
- लाहिडी, प्रबोधचन्द्रः; शास्त्री हृषीकेशः। पाणिनीयम्। दि ढाका स्टुडेन्टस् लाइब्रेरी। कलकाता 700073। जुलाइ, 2012।
- भट्टाचार्य्यः, तपनशङ्करः। सम्पादकः। लघुसिद्धान्तकौमुदी। संस्कृत वुक डिपो। कलकाता 700006। मे, 2018।
- बन्द्योपाध्यायः, अशोककुमारः। संस्कृत बांला अभिधान। संस्कृत पुस्तक भाण्डार। कलकाता 700006। वइमेला, 1408।
- शास्त्री, द्वारिकादासः ; शुक्लः, कालिकाप्रसादः। सम्पादकौ। काशिकावृत्तिः(पाणिनीयाष्टाध्यायीव्याख्या, 4-भागः)। तारा पाब्लिकेशन्स। वाराणसी। 1967।
- मुखोपाध्यायः, सच्चिदानन्दः। सम्पादकः। वैयाकरणसिद्धान्तकौमुदी(समासप्रकरणम्)। साहित्यनिकेतनम्। कलकाता। आगस्ट, 2012-13।
- अञ्जयः, तपनकुमारः। संस्कृतदिशा। ज्ञानवाणी। कलकाता। एप्रिल, 2013।